# Vishnusuktam

# શ્રીવિષ્ણુસૂક્તમ્

## Document Information

Text title : Vishnusukta

File name : vishnusukta.itx

Category : sUkta, veda, svara, vishhnu, vishnu

Location : doc_veda

Author : Vedic Tradition

Transliterated by : Rajagopal Iyer

Proofread by : Rajagopal Iyer, Muralikesavan T

Description-comments : Rigveda Mandala 1, sUktas 22/154/155/156, Mandala 6, sUkta 69, and Mandala 7 sUkta 99 and 100

Latest update : December 4, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 4, 2023

*sanskritdocuments.org*

Vishnusuktam

# શ્રીવિષ્ણુસૂક્તમ્

(૧.૨૨) પ્રથમમં મણ્ડલં દ્વાવિંશં સૂક્તસ્ય ભાગઃ

ઋષિઃ - મેધતિથિઃ કાણ્વઃ । દેવતા - વિષ્ણુઃ ।

ચન્દઃ - ૧૬, ૨૦, ૨૧ ગાયત્રી; ૧૭, ૧૮ પિપીલિકામશ્યાનિચૃદ્ગાયત્રી;

૧૯ નિચૃદ્ ગાયત્રી, સ્વરઃ - ષડ્જઃ ।

અતો દેવા અવન્તુ નો યતો વિષ્ણુર્વિચક્રમે ।

પૃથિવ્યાઃ સપ્ત ધામભિઃ ॥ ૧.૦૨૨.૧૬

ઇદં વિષ્ણુર્વિ ચક્રમે ત્રેધા નિ દધે પદમ્ ।

સમૂળ્હમસ્ય પાંસુરે ॥ ૧.૦૨૨.૧૭

ત્રીણિ પદા વિ ચક્રમે વિષ્ણુર્ગોપા અદાભ્યઃ ।

અતો ધર્માણિ ધારયન્ ॥ ૧.૦૨૨.૧૮

વિષ્ણોઃ કર્માણિ પશ્યત યતો વ્રતાનિ પસ્પશે ।

ઇન્દ્રસ્ય યુજ્યઃ સખા ॥ ૧.૦૨૨.૧૯

તદ્વિષ્ણોઃ પરમં પદં સદા પશ્યન્તિ સૂરયઃ ।

દિવીવ ચક્ષુરાતતમ્ ॥ ૧.૦૨૨.૨૦

તદ્વિપ્રાસો વિપન્યવો જાગૃવાંસઃ સમિન્ધતે ।

વિષ્ણોર્યત્પરમં પદમ્ ॥ ૧.૦૨૨.૨૧

(૧.૧૫૪) પ્રથમમં મણ્ડલં ચતુષ્પઞ્ચાશદુત્તરશતતમં સૂક્તમ્

ઋષિઃ - દિર્ઘતમાઃ ઔચથ્ય । દેવતા - વિષ્ણુઃ ।

ચન્દઃ - ૧, ૨ વિરાટ્ત્રિષ્ટુપ્, ૩, ૪, ૬ નિચૃત્ત્રિષ્ટુપ્; ૫ ત્રિષ્ટુપ્,

સ્વરઃ - ધૈવતઃ ।

વિષ્ણોર્નુ કં વીર્યાણિ પ્ર વોચં યઃ પાર્થિવાનિ વિમમે રજાંસિ ।

યો અસ્કભાયદુત્તરં સધસ્થં વિચક્રમાણસ્ત્રેધોરુગાયઃ ॥ ૧.૧૫૪.૦૧

પ્ર તદ્વિષ્ણુઃ સ્તવતે વીર્યેણ મૃગો ન ભીમઃ કુચરો ગિરિષ્ઠાઃ ।
યસ્યોરુષુ ત્રિષુ વિક્રમણેષ્વધિક્ષિયન્તિ ભુવનાનિ વિશ્વા ॥ ૧.૧૫૪.૦૨

પ્ર વિષ્ણવે શૂષમેતુ મન્મ ગિરિક્ષિત ઉરુગાયાય વૃષ્ણે ।
ય ઇદં દીર્ઘં પ્રયતં સધસ્થમેકો વિમમે ત્રિભિરિત્પદેભિઃ ॥ ૧.૧૫૪.૦૩

યસ્ય ત્રી પૂર્ણા મધુના પદાન્યક્ષીયમાણા સ્વધયા મદન્તિ ।
ય ઉ ત્રિધાતુ પૃથિવીમુત દ્યામેકો દાધાર ભુવનાનિ વિશ્વા ॥ ૧.૧૫૪.૦૪

તદસ્ય પ્રિયમભિ પાથો અશ્યાં નરો યત્ર દેવયવો મદન્તિ ।
ઉરુક્રમસ્ય સ હિ બન્ધુરિત્થા વિષ્ણોઃ પદે પરમે મધ્વ ઉત્સઃ ॥ ૧.૧૫૪.૦૫

તા વાં વાસ્તૂન્યુશ્મસિ ગમધ્યૈ યત્ર ગાવો ભૂરિશ‍ૃઙ્ગા અયાસઃ ।
અત્રાહ તદુરુગાયસ્ય વૃષ્ણઃ પરમં પદમવ ભાતિ ભૂરિ ॥ ૧.૧૫૪.૦૬

(૧.૧૫૫) પ્રથમમં મણ્ડલં પઞ્ચપઞ્ચાશદુત્તરશતતમં સૂક્તમ્

ઋષિઃ - દીર્ઘતમાઃ ઔચથ્ય । દેવતા - વિષ્ણુઃ (૨ ઇન્દ્રઃ, વિષ્ણુઃ) ।
છન્દઃ - ૧, ૩, ૬ ભુરિક્ત્રિષ્ટુપ્; ૨ નિચૃજ્જગતી; ૪ સ્વરાટ્ત્રિષ્ટુપ્;
૫ નિચૃત્ત્રિષ્ટુપ્ । સ્વરઃ - ૧, ૩-૬ ધૈવતઃ; ૨ નિષાદઃ ।

પ્ર વઃ પાન્તમન્ધસો ધિયાયતે મહે શૂરાય વિષ્ણવે ચાર્ચત ।
યા સાનુનિ પર્વતાનામદાભ્યા મહસ્તસ્થતુરર્વતેવ સાધુના ॥ ૧.૧૫૫.૦૧

ત્વેષમિત્થા સમરણં શિમીવતોરિન્દ્રાવિષ્ણૂ સુતપા વામુરુષ્યતિ ।
યા મર્ત્યાય પ્રતિધીયમાનમિત્કૃશાનોરસ્તુરસનામુરુષ્યથઃ ॥ ૧.૧૫૫.૦૨

તા ઈં વર્ધન્તિ મહ્યસ્ય પૌંસ્યં નિ માતરા નયતિ રેતસે ભુજે ।
દધાતિ પુત્રોઽવરં પરં પિતુર્નામ તૃતીયમધિ રોચને દિવઃ ॥ ૧.૧૫૫.૦૩

તત્તદિદસ્ય પૌંસ્યં ગૃણીમસીનસ્ય ત્રાતુરવૃકસ્ય મીળ્હુષઃ ।
યઃ પાર્થિવાનિ ત્રિભિરિદ્વિગામભિરુરુ ક્રમિષ્ટોરુગાયાય જીવસે ॥ ૧.૧૫૫.૦૪

દ્વે ઇદસ્ય ક્રમણે સ્વર્દૃશોઽભિખ્યાય મર્ત્યો ભુરણ્યતિ ।
તૃતીયમસ્ય નકિરા દધર્ષતિ વયશ્ચન પતયન્તઃ પતત્રિણઃ ॥ ૧.૧૫૫.૦૫

ચતુર્ભિઃ સાકં નવતિં ચ નામભિશ્ચક્રં ન વૃત્તં વ્યતીઁરવીવિપત્ ।
બૃહચ્છરીરો વિમિમાન ઋક્વભિર્યુવાકુમારઃ પ્રત્યેત્યાહવમ્ ॥ ૧.૧૫૫.૦૬

(૧.૧૫૬) પ્રથમમં મણ્ડલં ષટ્પઞ્ચાશદુત્તરશતતમં સૂક્તમ્

ઋષિઃ - દીર્ઘતમાઃ । દેવતા - વિષ્ણુઃ । છન્દઃ - ૧ નિચૃત્ત્રિષ્ટુપ્;
૨ વિરાટ્ત્રિષ્ટુપ્; ૩ નિચૃજ્જગતી; ૪ જગતી; ૫ સ્વરાટ્ત્રિષ્ટુપ્ ।
સ્વરઃ - ૧, ૨, ૫ ધૈવતઃ; ૩, ૪ નિષાદઃ ।

ભવા મિત્રો ન શેવ્યો ઘૃતાસુતિર્વિભૂતદ્યુમ્ન એવયા ઉ સપ્રથાઃ ।
અધા તે વિષ્ણો વિદુષા ચિદર્ધ્યઃ સ્તોમો યજ્ઞશ્ચ રાધ્યો હવિષ્મતા ॥ ૧.૧૫૬.૦૧

યઃ પૂર્વ્યાય વેધસે નવીયસે સુમજ્જાનયે વિષ્ણવે દદાશતિ ।
યો જાતમસ્ય મહતો મહિ બ્રવત્સેદુ શ્રવોભિર્યુજ્યં ચિદભ્યસત્ ॥ ૧.૧૫૬.૦૨

તમુ સ્તોતારઃ પૂર્વ્યં યથા વિદ ઋતસ્ય ગર્ભં જનુષા પિપર્તન ।
આસ્ય જાનન્તો નામ ચિદ્વિવક્તન મહસ્તે વિષ્ણો સુમતિં ભજામહે ॥ ૧.૧૫૬.૦૩

તમસ્ય રાજા વરુણસ્તમશ્વિના ક્રતું સચન્ત મારુતસ્ય વેધસઃ ।
દાધાર દક્ષમુત્તમમહર્વિદં વ્રજં ચ વિષ્ણુઃ સખિવાઁ અપોર્ણુતે ॥ ૧.૧૫૬.૦૪

આ યો વિવાય સચથાય દૈવ્ય ઇન્દ્રાય વિષ્ણુઃ સુકૃતે સુકૃત્તરઃ ।
વેધા અજિન્વત્ત્રિષધસ્થ આર્યમૃતસ્ય ભાગે યજમાનમાભજત્ ॥ ૧.૧૫૬.૦૫

(૬.૬૯) ષષ્ઠં મણ્ડલં એકોનસપ્તતિતમં સૂક્તમ્

ઋષિઃ - ભરદ્વાજો બાર્હસ્પત્યઃ । દેવતા - ઇન્દ્રાવિષ્ણૂ ।
છન્દઃ - ૧, ૩, ૬, ૭નિચૃત્ત્રિષ્ટુપ્; ૨, ૪, ૮ ત્રિષ્ટુપ્; ૫ બ્રાહ્મ્યુષ્ણિક્ ।
સ્વરઃ - ૧-૪, ૬-૮ ધૈવતઃ; ૫ ઋષભઃ ।

સં વાં કર્મણા સમિષા હિનોમીન્દ્રાવિષ્ણૂ અપસસ્પારે અસ્ય ।
જુષેથાં યજ્ઞં દ્રવિણં ચ ધત્તમરિષ્ટૈર્નઃ પથિભિઃ પારયન્તા ॥ ૬.૦૬૯.૦૧

યા વિશ્વાસાં જનિતારા મતીનામિન્દ્રાવિષ્ણૂ કલશા સોમધાના ।
પ્ર વાં ગિરઃ શસ્યમાના અવન્તુ પ્ર સ્તોમાસો ગીયમાનાસો અર્કૈઃ ॥ ૬.૦૬૯.૦૨

ઇન્દ્રાવિષ્ણૂ મદપતી મદાનામા સોમં યાતં દ્રવિણો દધાના ।
સં વામઞ્જન્ત્વક્તુભિર્મતીનાં સં સ્તોમાસઃ શસ્યમાનાસ ઉક્થૈઃ ॥ ૬.૦૬૯.૦૩

આ વામશ્વાસો અભિમાતિષાહ ઇન્દ્રાવિષ્ણૂ સધમાદો વહન્તુ ।
જુષેથાં વિશ્વા હવના મતીનામુપ બ્રહ્માણિ શૃણુતં ગિરો મે ॥ ૬.૦૬૯.૦૪

ઇન્દ્રાવિષ્ણૂ તત્પનયાય્યં વાં સોમસ્ય મદ ઉરુ ચક્રમાથે ।
અકૃણુતમન્તરિક્ષં વરીયોઽપ્રથતં જીવસે નો રજાંસિ ॥ ૬.૦૬૯.૦૫

ઇન્દ્રાવિષ્ણૂ હવિષા વાવૃધાનાગ્રાદ્વાના નમસા રાતહવ્યા ।
ઘૃતાસુતી દ્રવિણં ધત્તમસ્મે સમુદ્રઃ સ્થઃ કલશઃ સોમધાનઃ ॥ ૬.૦૬૯.૦૬

ઇન્દ્રાવિષ્ણૂ પિબતં મધ્વો અસ્ય સોમસ્ય દસ્રા જઠરં પૃણેથામ્ ।
આ વામન્ધાંસિ મદિરાણ્યગ્મન્નુપ બ્રહ્માણિ શૃણુતં હવં મે ॥ ૬.૦૬૯.૦૭

ઉભા જિગ્યથુર્ન પરા જયેથે ન પરા જિગ્યે કતરશ્ચનૈનોઃ ।
ઇન્દ્રશ્ચ વિષ્ણો યદપસ્પૃધેથાં ત્રેધા સહસ્રં વિ તદૈરયેથામ્ ॥ ૬.૦૬૯.૦૮

(૭.૯૯) સપ્તમમં મણ્ડલં નવનવતિતમં સૂક્તમ્

ઋષિઃ - વસિષ્ઠઃ । દેવતા - ૧-૩, ૭ વિષ્ણુઃ; ૪-૬ ઇન્દ્રાવિષ્ણૂ ।
છન્દઃ - ૧, ૬ વિરાટ્ત્રિષ્ટુપ્; ૨, ૩ ત્રિષ્ટુપ્; ૪, ૫, ૭ નિચૃત્ત્રિષ્ટુપ્ ।
સ્વરઃ - ધૈવતઃ ।

પરો માત્રયા તન્વા વૃધાન ન તે મહિત્વમન્વશ્નુવન્તિ ।
ઉભે તે વિદ્મ રજસી પૃથિવ્યા વિષ્ણો દેવ ત્વં પરમસ્ય વિત્સે ॥ ૭.૦૯૯.૦૧

ન તે વિષ્ણો જાયમાનો ન જાતો દેવ મહિમ્નઃ પરમન્તમાપ ।
ઉદસ્તભ્ના નાકમૃષ્વં બૃહન્તં દાધર્થ પ્રાચીં કકુભં પૃથિવ્યાઃ ॥ ૭.૦૯૯.૦૨

ઇરાવતી ધેનુમતી હિ ભૂતં સૂયવસિની મનુષે દશસ્યા ।
વ્યસ્તભ્ના રોદસી વિષ્ણવેતે દાધર્થ પૃથિવીમભિતો મયૂખૈઃ ॥ ૭.૦૯૯.૦૩

ઉરું યજ્ઞાય ચક્રથુરુ લોકં જનયન્તા સૂર્યમુષાસમગ્નિમ્ ।
દાસસ્ય ચિદ્વૃષશિપ્રસ્ય માયા જઘ્નથુર્નરા પૃતનાજ્યેષુ ॥ ૭.૦૯૯.૦૪

ઇન્દ્રાવિષ્ણૂ દૃંહિતાઃ શમ્બરસ્ય નવ પુરો નવતિં ચ શ્નથિષ્ટમ્ ।
શતં વર્ચિનઃ સહસ્રં ચ સાકં હથો અપ્રત્યસુરસ્ય વીરાન્ ॥ ૭.૦૯૯.૦૫

ઇયં મનીષા બૃહતી બૃહન્તોરુક્રમા તવસા વર્ધયન્તી ।
રરે વાં સ્તોમં વિદથેષુ વિષ્ણો પિન્વતમિષો વૃજનેષ્વિન્દ્ર ॥ ૭.૦૯૯.૦૬

વષટ્ તે વિષ્ણવાસ આ કૃણોમિ તન્મે જુષસ્વ શિપિવિષ્ટ હવ્યમ્ ।
વર્ધન્તુ ત્વા સુષ્ટુતયો ગિરો મે યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૯૯.૦૭

(૭.૧૦૦) સપ્તમમં મણ્ડલં શતતમં સૂક્તમ્

ઋષિઃ - વસિષ્ઠઃ મૈત્રાવરુણિ । દેવતા - વિષ્ણુઃ ।

છન્દઃ - ૧, ૨, ૫-૭ નિચૃત્ત્રિષ્ટુપ્; ૩ વિરાટ્ત્રિષ્ટુપ્; ૪ આર્ષીત્રિષ્ટુપ્ ।

સ્વરઃ - ધૈવતઃ ।

નૂ મર્તો દયતે સનિષ્યન્યો વિષ્ણવ ઉરુગાયાય દાશત્ ।

પ્ર યઃ સત્રાચા મનસા યજાત એતાવન્તં નર્યમાવિવાસાત્ ॥ ૭.૧૦૦.૦૧

ત્વં વિષ્ણો સુમતિં વિશ્વજન્યામપ્રયુતામેવયાવો મતિં દાઃ ।

પર્ચો યથા નઃ સુવિતસ્ય ભૂરેરશ્વાવતઃ પુરુશ્ચન્દ્રસ્ય રાયઃ ॥ ૭.૧૦૦.૦૨

ત્રિર્દેવઃ પૃથિવીમેષ એતાં વિ ચક્રમે શતર્ચસં મહિત્વા ।

પ્ર વિષ્ણુરસ્તુ તવસસ્તવીયાન્ત્વેષં હ્યસ્ય સ્થવિરસ્ય નામ ॥ ૭.૧૦૦.૦૩

વિ ચક્રમે પૃથિવીમેષ એતાં ક્ષેત્રાય વિષ્ણુર્મનુષે દશસ્યન્ ।

ધ્રુવાસો અસ્ય કીરયો જનાસ ઉરુક્ષિતિં સુજનિમા ચકાર ॥ ૭.૧૦૦.૦૪

પ્ર તત્તે અદ્ય શિપિવિષ્ટ નામાર્યઃ શંસામિ વયુનાનિ વિદ્વાન્ ।

તં ત્વા ગૃણામિ તવસમતવ્યાન્ક્ષયન્તમસ્ય રજસઃ પરાકે ॥ ૭.૧૦૦.૦૫

કિમિત્તે વિષ્ણો પરિચક્ષ્યં ભૂત્પ્ર યદ્વવક્ષે શિપિવિષ્ટો અસ્મિ ।

મા વર્પો અસ્મદપ ગૂહ એતદ્યદન્યરૂપઃ સમિથે બભૂથ ॥ ૭.૧૦૦.૦૬

વષટ્ તે વિષ્ણવાસ આ કૃણોમિ તન્મે જુષસ્વ શિપિવિષ્ટ હવ્યમ્ ।

વર્ધન્તુ ત્વા સુષ્ટુતયો ગિરો મે યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૧૦૦.૦૭

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

# શ્રીવિષ્ણુસૂક્તમ્

## સ્વરાङ्कनવિરહિતમ્

(૧.૨૨) પ્રથમમં મણ્ડલં દ્વાવિંશં સૂક્તસ્ય ભાગઃ
ઋષિઃ - મેધતિથિઃ કાન્વઃ । દેવતા - વિષ્ણુઃ ।
ચન્દઃ - ૧૬, ૨૦, ૨૧ ગાયત્રી; ૧૭, ૧૮ પિપીલિકામશ્યાનિચૃદ્ગાયત્રી;
૧૯ નિચૃદ્ ગાયત્રી, સ્વરઃ - ષડ્જઃ ।

અતો દેવા અવન્તુ નો યતો વિષ્ણુર્વિચક્રમે ।
પૃથિવ્યાઃ સપ્ત ધામભિઃ ॥ ૧.૦૨૨.૧૬

ઇદં વિષ્ણુર્વિ ચક્રમે ત્રેધા નિ દધે પદમ્ ।
સમૂળ્હમસ્ય પાંસુરે ॥ ૧.૦૨૨.૧૭

ત્રીણિ પદા વિ ચક્રમે વિષ્ણુર્ગોપા અદાભ્યઃ ।
અતો ધર્માણિ ધારયન્ ॥ ૧.૦૨૨.૧૮

વિષ્ણોઃ કર્માણિ પશ્યત યતો વ્રતાનિ પસ્પશે ।
ઇન્દ્રસ્ય યુજ્યઃ સખા ॥ ૧.૦૨૨.૧૯

તદ્વિષ્ણોઃ પરમં પદં સદા પશ્યન્તિ સૂરયઃ ।
દિવીવ ચક્ષુરાતતમ્ ॥ ૧.૦૨૨.૨૦

તદ્વિપ્રાસો વિપન્યવો જાગૃવાંસઃ સમિન્ધતે ।
વિષ્ણોર્યત્પરમં પદમ્ ॥ ૧.૦૨૨.૨૧

(૧.૧૫૪) પ્રથમમં મણ્ડલં ચતુષ્પઞ્ચાશદુત્તરશતતમં સૂક્તમ્
ઋષિઃ - દિર્ઘતમાઃ ઔચથ્ય । દેવતા - વિષ્ણુઃ ।
ચન્દઃ - ૧, ૨ વિરાટ્ત્રિષ્ટુપ્, ૩, ૪, ૬ નિચૃત્ત્રિષ્ટુપ્; ૫ ત્રિષ્ટુપ્,
સ્વરઃ - ધૈવતઃ ।

વિષ્ણોર્નુ કં વીર્યાણિ પ્ર વોચં યઃ પાર્થિવાનિ વિમમે રજાંસિ ।
યો અસ્કભાયદુત્તરં સધસ્થં વિચક્રમાણસ્ત્રેધોરુગાયઃ ॥ ૧.૧૫૪.૦૧

પ્ર તદ્વિષ્ણુઃ સ્તવતે વીર્યેણ મૃગો ન ભીમઃ કુચરો ગિરિષ્ઠાઃ ।
યસ્યોરુષુ ત્રિષુ વિક્રમણેષ્વધિક્ષિયન્તિ ભુવનાનિ વિશ્વા ॥ ૧.૧૫૪.૦૨

પ્ર વિષ્ણવે શૂષમેતુ મન્મ ગિરિક્ષિત ઉરુગાયાય વૃષ્ણે ।
ય ઇદં દીર્ઘં પ્રયતં સધસ્થમેકો વિમમે ત્રિભિરિત્પદેભિઃ ॥ ૧.૧૫૪.૦૩

યસ્ય ત્રી પૂર્ણા મધુના પદાન્યક્ષીયમાણા સ્વધયા મદન્તિ ।
ય ઉ ત્રિધાતુ પૃથિવીમુત દ્યામેકો દાધાર ભુવનાનિ વિશ્વા ॥ ૧.૧૫૪.૦૪

તદસ્ય પ્રિયમભિ પાથો અશ્યાં નરો યત્ર દેવયવો મદન્તિ ।
ઉરુક્રમસ્ય સ હિ બન્ધુરિત્થા વિષ્ણોઃ પદે પરમે મધ્વ ઉત્સઃ ॥ ૧.૧૫૪.૦૫

તા વાં વાસ્તૂન્યુશ્મસિ ગમધ્યૈ યત્ર ગાવો ભૂરિશૃઙ્ગા અયાસઃ ।
અત્રાહ તદુરુગાયસ્ય વૃષ્ણઃ પરમં પદમવ ભાતિ ભૂરિ ॥ ૧.૧૫૪.૦૬

(૧.૧૫૫) પ્રથમમં મણ્ડલં પઞ્ચપઞ્ચાશદુત્તરશતતમં સૂક્તમ્
ઋષિઃ - દીર્ઘતમાઃ ઔચથ્ય । દેવતા - વિષ્ણુઃ (૨ ઇન્દ્રઃ, વિષ્ણુઃ) ।
છન્દઃ - ૧, ૩, ૬ ભુરિક્ત્રિષ્ટુપ્; ૨ નિચૃજ્જગતી; ૪ સ્વરાટ્ત્રિષ્ટુપ્;
૫ નિચૃત્ત્રિષ્ટુપ્ । સ્વરઃ - ૧, ૩-૬ ધૈવતઃ; ૨ નિષાદઃ ।

પ્ર વઃ પાન્તમન્ધસો ધિયાયતે મહે શૂરાય વિષ્ણવે ચાર્ચત ।
યા સાનુનિ પર્વતાનામદાભ્યા મહસ્તસ્થતુરર્વતેવ સાધુના ॥ ૧.૧૫૫.૦૧

ત્વેષમિત્થા સમરણં શિમીવતોરિન્દ્રાવિષ્ણૂ સુતપા વામુરુષ્યતિ ।
યા મર્ત્યાય પ્રતિધીયમાનમિત્કૃશાનોરસ્તુરસનામુરુષ્યથઃ ॥ ૧.૧૫૫.૦૨

તા ઈં વર્ધન્તિ મહ્યસ્ય પૌંસ્યં નિ માતરા નયતિ રેતસે ભુજે ।
દધાતિ પુત્રોઽવરં પરં પિતુર્નામ તૃતીયમધિ રોચને દિવઃ ॥ ૧.૧૫૫.૦૩

તત્તદિદસ્ય પૌંસ્યં ગૃણીમસીનસ્ય ત્રાતુરવૃકસ્ય મીળ્હુષઃ ।
યઃ પાર્થિવાનિ ત્રિભિરિદ્વિગામભિરુરુ ક્રમિષ્ટોરુગાયાય જીવસે ॥ ૧.૧૫૫.૦૪

દ્વે ઇદસ્ય ક્રમણે સ્વર્દૃશોઽભિખ્યાય મર્ત્યો ભુરણ્યતિ ।
તૃતીયમસ્ય નકિરા દધર્ષતિ વયશ્ચન પતયન્તઃ પતત્રિણઃ ॥ ૧.૧૫૫.૦૫

ચતુર્ભિઃ સાકં નવતિં ચ નામભિશ્ચક્રં ન વૃત્તં વ્યતીઁરવીવિપત્ ।
બૃહચ્છરીરો વિમિમાન ઋક્વભિર્યુવાકુમારઃ પ્રત્યેત્યાહવમ્ ॥ ૧.૧૫૫.૦૬

(૧.૧૫૬) પ્રથમમં મણ્ડલં ષટ્પઞ્ચાશદુત્તરશતતમં સૂક્તમ્
ઋષિઃ - દીર્ઘતમાઃ । દેવતા - વિષ્ણુઃ । છન્દઃ - ૧ નિચૃત્ત્રિષ્ટુપ્;

૨ વિરાટ્ત્રિષ્ટુપ્; ૩ નિચૃજ્જગતી; ૪ જગતી; ૫ સ્વરાટ્ત્રિષ્ટુપ્ ।
સ્વરઃ - ૧, ૨, ૫ ધૈવતઃ; ૩, ૪ નિષાદઃ ।

ભવા મિત્રો ન શેવ્યો ઘૃતાસુતિર્વિભૂતદ્યુમ્ન એવયા ઉ સપ્રથાઃ ।
અધા તે વિષ્ણો વિદુષા ચિદર્ધ્યઃ સ્તોમો યજ્ઞશ્ચ રાધ્યો હવિષ્મતા ॥ ૧.૧૫૬.૦૧

યઃ પૂર્વ્યાય વેધસે નવીયસે સુમજ્જાનયે વિષ્ણવે દદાશતિ ।
યો જાતમસ્ય મહતો મહિ બ્રવત્સેદુ શ્રવોભિર્યુજ્યં ચિદભ્યસત્ ॥ ૧.૧૫૬.૦૨

તમુ સ્તોતારઃ પૂર્વ્યં યથા વિદ ઋતસ્ય ગર્ભં જનુષા પિપર્તન ।
આસ્ય જાનન્તો નામ ચિદ્વિવક્તન મહસ્તે વિષ્ણો સુમતિં ભજામહે ॥ ૧.૧૫૬.૦૩

તમસ્ય રાજા વરુણસ્તમશ્વિના ક્રતું સચન્ત મારુતસ્ય વેધસઃ ।
દાધાર દક્ષમુત્તમમહર્વિદં વ્રજં ચ વિષ્ણુઃ સખિવાઁ અપોર્ણુતે ॥ ૧.૧૫૬.૦૪

આ યો વિવાય સચથાય દૈવ્ય ઇન્દ્રાય વિષ્ણુઃ સુકૃતે સુકૃત્તરઃ ।
વેધા અજિન્વત્ત્રિષધસ્થ આર્યમૃતસ્ય ભાગે યજમાનમાભજત્ ॥ ૧.૧૫૬.૦૫

(૬.૬૯) ષષ્ઠં મણ્ડલં એકોનસપ્તતિતમં સૂક્તમ્
ઋષિઃ - ભરદ્વાજો બાર્હસ્પત્યઃ । દેવતા - ઇન્દ્રાવિષ્ણૂ ।
છન્દઃ - ૧, ૩, ૬, ૭નિચૃત્ત્રિષ્ટુપ્; ૨, ૪, ૮ ત્રિષ્ટુપ્; ૫ બ્રાહ્મ્યુષ્ણિક્ ।
સ્વરઃ - ૧-૪, ૬-૮ ધૈવતઃ; ૫ ઋષભઃ ।

સં વાં કર્મણા સમિષા હિનોમીન્દ્રાવિષ્ણૂ અપસસ્પારે અસ્ય ।
જુષેથાં યજ્ઞં દ્રવિણં ચ ધત્તમરિષ્ટૈર્નઃ પથિભિઃ પારયન્તા ॥ ૬.૦૬૯.૦૧

યા વિશ્વાસાં જનિતારા મતીનામિન્દ્રાવિષ્ણૂ કલશા સોમધાના ।
પ્ર વાં ગિરઃ શસ્યમાના અવન્તુ પ્ર સ્તોમાસો ગીયમાનાસો અર્કૈઃ ॥ ૬.૦૬૯.૦૨

ઇન્દ્રાવિષ્ણૂ મદપતી મદાનામા સોમં યાતં દ્રવિણો દધાના ।
સં વામઞ્જન્ત્વક્તુભિર્મતીનાં સં સ્તોમાસઃ શસ્યમાનાસ ઉક્થૈઃ ॥ ૬.૦૬૯.૦૩

આ વામશ્વાસો અભિમાતિષાહ ઇન્દ્રાવિષ્ણૂ સધમાદો વહન્તુ ।
જુષેથાં વિશ્વા હવના મતીનામુપ બ્રહ્માણિ શ઼ૃણુતં ગિરો મે ॥ ૬.૦૬૯.૦૪

ઇન્દ્રાવિષ્ણૂ તત્પનયાય્યં વાં સોમસ્ય મદ ઉરુ ચક્રમાથે ।
અકૃણુતમન્તરિક્ષં વરીયોઽપ્રથતં જીવસે નો રજાંસિ ॥ ૬.૦૬૯.૦૫

ઇન્દ્રાવિષ્ણૂ હવિષા વાવૃધાનાગ્રાદ્વાના નમસા રાતહવ્યા ।
ઘૃતાસુતી દ્રવિણં ધત્તમસ્મે સમુદ્રઃ સ્થઃ કલશઃ સોમધાનઃ ॥ ૬.૦૬૯.૦૬

ઇન્દ્રાવિષ્ણૂ પિબતં મધ્વો અસ્ય સોમસ્ય દસ્રા જઠરં પૃણેથામ્ ।
આ વામન્ધાંસિ મદિરાણ્યગ્મન્નુપ બ્રહ્માણિ શ઼ૃણુતં હવં મે ॥ ૬.૦૬૯.૦૭

ઉભા જિગ્યથુર્ન પરા જયેથે ન પરા જિગ્યે કતરશ્ચનૈનોઃ ।
ઇન્દ્રશ્ચ વિષ્ણો યદપસ્પૃધેથાં ત્રેધા સહસ્રં વિ તદૈરયેથામ્ ॥ ૬.૦૬૯.૦૮

(૭.૯૯) સપ્તમમં મણ્ડલં નવનવતિતમં સૂક્તમ્
ઋષિઃ - વસિષ્ઠઃ । દેવતા - ૧-૩, ૭ વિષ્ણુઃ; ૪-૬ ઇન્દ્રાવિષ્ણૂ ।
છન્દઃ - ૧, ૬ વિરાટ્ત્રિષ્ટુપ્; ૨, ૩ ત્રિષ્ટુપ્; ૪, ૫, ૭ નિચૃત્ત્રિષ્ટુપ્ ।
સ્વરઃ - ધૈવતઃ ।

પરો માત્રયા તન્વા વૃધાન ન તે મહિત્વમન્વશ્નુવન્તિ ।
ઉભે તે વિદ્મ રજસી પૃથિવ્યા વિષ્ણો દેવ ત્વં પરમસ્ય વિત્સે ॥ ૭.૦૯૯.૦૧

ન તે વિષ્ણો જાયમાનો ન જાતો દેવ મહિમ્નઃ પરમન્તમાપ ।
ઉદસ્તભ્ના નાકમૃષ્વં બૃહન્તં દાધર્થ પ્રાચીં કકુભં પૃથિવ્યાઃ ॥ ૭.૦૯૯.૦૨

ઇરાવતી ધેનુમતી હિ ભૂતં સૂયવસિની મનુષે દશસ્યા ।
વ્યસ્તભ્ના રોદસી વિષ્ણવેતે દાધર્થ પૃથિવીમભિતો મયૂખૈઃ ॥ ૭.૦૯૯.૦૩

ઉરું યજ્ઞાય ચક્રથુરુ લોકં જનયન્તા સૂર્યમુષાસમગ્નિમ્ ।
દાસસ્ય ચિદ્વૃષશિપ્રસ્ય માયા જઘ્નથુર્નરા પૃતનાજ્યેષુ ॥ ૭.૦૯૯.૦૪

ઇન્દ્રાવિષ્ણૂ દૃંહિતાઃ શમ્બરસ્ય નવ પુરો નવતિં ચ શ્નથિષ્ટમ્ ।
શતં વર્ચિનઃ સહસ્રં ચ સાકં હથો અપ્રત્યસુરસ્ય વીરાન્ ॥ ૭.૦૯૯.૦૫

ઇયં મનીષા બૃહતી બૃહન્તોરુક્રમા તવસા વર્ધયન્તી ।
રરે વાં સ્તોમં વિદથેષુ વિષ્ણો પિન્વતમિષો વૃજનેષ્વિન્દ્ર ॥ ૭.૦૯૯.૦૬

વષટ્ તે વિષ્ણવાસ આ કૃણોમિ તન્મે જુષસ્વ શિપિવિષ્ટ હવ્યમ્ ।
વર્ધન્તુ ત્વા સુષ્ટુતયો ગિરો મે યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૦૯૯.૦૭

(૭.૧૦૦) સપ્તમમં મણ્ડલં શતતમં સૂક્તમ્
ઋષિઃ - વસિષ્ઠઃ મૈત્રાવરુણિ । દેવતા - વિષ્ણુઃ ।
છન્દઃ - ૧, ૨, ૫-૭ નિચૃત્ત્રિષ્ટુપ્; ૩ વિરાટ્ત્રિષ્ટુપ્; ૪ આર્ષીત્રિષ્ટુપ્ ।
સ્વરઃ - ધૈવતઃ ।

નૂ મર્તો દયતે સનિષ્યન્યો વિષ્ણવ ઉરુગાયાય દાશત્ ।
પ્ર યઃ સત્રાચા મનસા યજાત એતાવન્તં નર્યમાવિવાસાત્ ॥ ૭.૧૦૦.૦૧

ત્વં વિષ્ણો સુમતિં વિશ્વજન્યામપ્રયુતામેવયાવો મતિં દાઃ ।
પર્ચો યથા નઃ સુવિતસ્ય ભૂરેરશ્વાવતઃ પુરુશ્ચન્દ્રસ્ય રાયઃ ॥ ૭.૧૦૦.૦૨

ત્રિર્દેવઃ પૃથિવીમેષ એતાં વિ ચક્રમે શતર્ચસં મહિત્વા ।
પ્ર વિષ્ણુરસ્તુ તવસસ્તવીયાન્ત્વેષં હ્યસ્ય સ્થવિરસ્ય નામ ॥ ૭.૧૦૦.૦૩

વિ ચક્રમે પૃથિવીમેષ એતાં ક્ષેત્રાય વિષ્ણુર્મનુષે દશસ્યન્ ।
ધ્રુવાસો અસ્ય કીરયો જનાસ ઉરુક્ષિતિં સુજનિમા ચકાર ॥ ૭.૧૦૦.૦૪

પ્ર તત્તે અદ્ય શિપિવિષ્ટ નામાર્યઃ શંસામિ વયુનાનિ વિદ્વાન્ ।
તં ત્વા ગૃણામિ તવસમતવ્યાન્ક્ષયન્તમસ્ય રજસઃ પરાકે ॥ ૭.૧૦૦.૦૫

કિમિત્તે વિષ્ણો પરિચક્ષ્યં ભૂત્પ્ર યદ્વવક્ષે શિપિવિષ્ટો અસ્મિ ।
મા વર્પો અસ્મદપ ગૂહ એતદ્યદન્યરૂપઃ સમિથે બભૂથ ॥ ૭.૧૦૦.૦૬

વષટ્ તે વિષ્ણવાસ આ કૃણોમિ તન્મે જુષસ્વ શિપિવિષ્ટ હવ્યમ્ ।
વર્ધન્તુ ત્વા સુષ્ટુતયો ગિરો મે યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૧૦૦.૦૭

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

The sUkta is combination of Rigveda Mandala 1, sUktas 22(portion), 154, 155, 156, Mandala 6, sUkta 69, and Mandala 7 sUktas 99 and 100.

---

*Vishnusuktam*

pdf was typeset on December 4, 2023

Please send corrections to *sanskrit@cheerful.com*